## चतुर्थाध्यायस्य चतुर्थः पादः

### प्राग्वहतेष्ठक्। (१/१५४८)

'तद्वहति रथयुगप्रासङ्गम्' (४.४.७६/१६२७) इति वक्ष्यति। प्रागेतस्माद् वहतिसंशब्दनाद् [1]यानर्थाननुक्रमिष्यामः, ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति – 'तेन दीव्यति खनति जयति जितम्' (४.४.२/१५५०) इति। अक्षैर्दीव्यति आक्षिकः[2]।

[४८२] ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसङ्ख्यानम्। (म.भा. २.३२९)

माशब्दः इत्याह माशब्दिकः। नैत्यशब्दिकः। कार्यशब्दिकः[3]। वाक्यादेतत् प्रत्ययविधानम्।

[४८३] आहौ प्रभूतादिभ्यः[4]। (म. भा. २.३२९)

प्रभूतमाह प्राभूतिकः। पार्याप्तिकः। क्रियाविशेषणात् प्रत्ययः।

[४८४] पृच्छतौ सुस्नातादिभ्यः। (म. भा. २.३२९)

सुस्नातं पृच्छति सौस्नातिकः। सौखरात्रिकः। [5]सौखशायनिकः।

[४८५] गच्छति परदारादिभ्यः। (म. भा. २.३२९)

परदारान् गच्छति पारदारिकः। गौरुतल्पिकः॥

### तेन दीव्यति खनति जयति जितम्। (२/१५५०)

तेन इति तृतीयासमर्थाद् दीव्यति खनति जयति जितम् [6]इत्येतेष्वर्थेषु ठक् प्रत्ययो भवति। अक्षैर्दीव्यति आक्षिकः। शालाकिकः। [7]अभ्र्या खनति आभ्रिकः। कौद्दालिकः। अक्षैर्जयति आक्षिकः। अक्षैर्जितम् आक्षिकम्। शालाकिकम्। सर्वत्र करणे तृतीया समर्थविभक्तिः। देवदत्तेन जितम् इति [8]प्रत्ययो न भवति, [9]अनभिधानात्। अङ्गुल्या खनति इति च। प्रत्ययार्थे सङ्ख्याकालयोरविवक्षा। क्रियाप्रधानत्वेऽपि[10] चाख्यातस्य तद्धितः स्वभावात् साधनप्रधानः॥

---

1. इत ऊर्ध्वम् यत् ह. 2. शातकिकः इत्यधिकम् ड. फ, अक्षैः जितः आक्षिकः ह. 3. स्वस्ति इत्याह सौवस्तिकः इत्यधिकम् ह. 4. उपसंख्यानम् इत्यधिकम् फ. ह. 5. सौखराजिक इत्यधिकम् ड, सौखयात्रिकः इत्यधिकम् फ. 6. एतेषु नास्ति फ. 7. आभ्र्या ब. 8. प्रत्ययो नास्ति फ. 9. अनभिधानात् नास्ति फ, अनभिधानात् च ड. ह. 10. अपि नास्ति फ, °तद्धितस्वभावात् साधनं प्रधानम् ड.